
P8P6I5

4 प्रेरणादीपः चाणक्यः



चन्द्रगुप्तः : आर्य चाणक्य! शीतकालः अस्ति। जनेषु कम्बलान् वितरतु।

चाणक्यः : महाराज! इदानीम् अहं कम्बलान् मम गृहं नयामि। प्रभाते वितरिष्यामि।

चन्द्रगुप्तः : तथा करोतु भवान्।

(त्रयः चौराः प्रविशन्ति।)

प्रथमः : चन्द्रगुप्तस्य मन्त्री चाणक्यः। एतत् तस्य गृहम्।

द्वितीयः : अत्र तैलदीपः। समीपे पीठम्। पुस्तकानि...।

तृतीयः : धनं कुत्र ?

प्रथमः : अत्र तु नास्ति। द्वितीयं प्रकोष्ठं प्रविशामः।

द्वितीयः : आश्चर्यम्! शैत्यम् अधिकम् अस्ति...।

तृतीयः : कम्बलाः समीपे एव सन्ति...।

प्रथमः : तथापि एषः महाशयः।

द्वितीयः : स्वयं कम्बलस्य उपयोगं न करोति।

तृतीयः : पुनश्च अधः शयनं करोति। आश्चर्यम्!

प्रथमः : तर्हि चाणक्यं पृच्छामः। ज्ञातव्यं तस्य रहस्यम्।

द्वितीयः : एतत् अस्माकं साहसम्!!

प्रथमः : आर्य! वयं चौराः स्मः। चौरकार्याय आगताः। महोदय! आश्चर्यम् अस्ति।

द्वितीयः : शैत्यम् अस्ति। कम्बलाः समीपे सन्ति। तथापि भवान् किमर्थम् उपयोगं न करोति ?

चाणक्यः : एते कम्बलाः मम कृते न, दरिद्रजनानां कृते सन्ति। यत् वस्तु अस्माकं नास्ति, तस्य उपयोगः पापम्।

सर्वे चौराः : अरे रे! वयं तु प्रतिदिनं पापं कुर्मः। चौरकार्येण एव उदरपूर्तिं कुर्मः। वयम् अद्य आरभ्य पापं न करिष्यामः। जयतु आर्यः।

टिप्पणी

शीतकालः શિયાળાનો ઠંડીનો સમય **जनेभ्यः** લોકોને, લોકો માટે **इदानीम्** હવે **नयामि** લઈ જાઉં છું **प्रकोष्ठम्** ઓરડો **अधः** નીચે **अद्य** આજે **ज्ञातव्यम्** જાણવું જોઈએ **कृते** માટે **कुर्मः** કરીએ છીએ.

स्वाध्यायः

T2M7Q4

1. નીચેના શબ્દોનું મોટેથી ઉચ્ચારણ કરો :

(1) कम्बलान् (2) चन्द्रगुप्तस्य (3) तैलदीपः (4) प्रकोष्ठम्

(5) शैत्यम् (6) पुनश्च (7) आश्चर्यम्

2. નીચે આપેલા પ્રશ્નોના જવાબ આપો :

(1) चन्द्रगुप्तः चाणक्यं किम् अवदत् ?

(2) चाणक्यः कम्बलान् कुत्र नयति ?

(3) चाणक्यस्य गृहे के प्रविशन्ति ?

(4) चाणक्यः किमर्थं कम्बलस्य उपयोगं न करोति ?

3. નીચે આપેલા ઉદાહરણના આધારે કૌંસના શબ્દોનો ઉપયોગ કરો અને અન્ય વાક્યો બનાવો :

ઉદાહરણ : सुरेशः पुस्तकम् - सुरेशस्य पुस्तकम् अस्ति।

(1) _____। (महेशः, लेखनी)

(2) _____। (राजेशः, सुधाखण्डः)

(3) _____। (शैलेषः, धनम्)

(4) _____। (मूकेशः, फलम्)

(5) _____। (मनीषः, उपनेत्रम्)

4. નીચે આપેલ ઉદાહરણ મુજબ અન્ય વાક્યો બનાવો :

ઉદાહરણ : अहं प्रविशामि। वयं प्रविशामः।

अहं खादामि। _____।

अहं गच्छामि। _____।

अहं पश्यामि। _____।

अहं पृच्छामि। _____।

अहं पठामि। _____।

5. નીચે આપેલા ઉદાહરણ મુજબ અન્ય વાક્યો બનાવો :

ઉદાહરણ : जनेषु कम्बलान् वितरतु।

(1) _____। (शिक्षकः, सुधाखण्डः)

(2) _____। (छात्रः, प्रसादः)

(3) _____। (बालकः, मोदकः)

(4) _____। (मानवः, दीपः)

प्रवृत्ति :

- ચાણક્યનું જીવનચરિત્ર પુસ્તકાલયમાંથી મેળવી વાંચવું.
- મહાપુરુષોના પ્રેરક પ્રસંગો એકઠા કરો.
- ઓછી જરૂરિયાતથી ચલાવતા ત્યાગી અને નિષ્ઠાપૂર્વક જીવન જીવતા તમારા વિસ્તારના મહાપુરુષો કે સામાન્ય વ્યક્તિના જીવનની વિગત મેળવો.